# Vasudharanamadharani Stotram

# વસુધારાનામધારણીસ્તોત્રમ્

## Document Information

Text title : Vasudharanamadharani Stotram

File name : vasudhArAnAmadhAraNIstotram.itx

Category : devii, devI, buddha, stotra, aShTottarashatanAma

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods,

Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# વસુધારાનામધારણીસ્તોત્રમ્

ૐ નમો
ભગવત્યૈ આર્યશ્રીવસુધારાયૈ ।
દિવ્યરૂપી સુરૂપી ચ સૌમ્યરૂપી બલપ્રદા । (વરપ્રદા)
વસુધરી વસુધારણી વસુશ્રી શ્રીકરી વરા ॥ ૧॥

ધરણી ધારણી ધાતા શરણ્યા ભક્તવત્સલા ।
પ્રજ્ઞાપારમિતા દેવી પ્રજ્ઞા શ્રીબુદ્ધિવર્ધિની ॥ ૨॥

વિદ્યાધરી શિવા સૂક્ષ્મા શાસ્તા સર્વત્ર માતૃકા । (શાન્તા)
તરુણી તારુ(૨)ણી દેવી વિદ્યાદાનેશ્વરેશ્વરી ॥ ૩॥

ભૂષિતા ભૂતમાતા ચ સર્વાભરણભૂષિતા ।
દુર્દાન્તત્રાસની ભીતા ઉગ્રા ઉગ્રપરાક્રમા ॥ ૪॥ (દુર્દાન્તવાસિની ભીમા)

દાનપારમિતા દેવી વર્ષણી દિવ્યરૂપિણી ।
નિધાનં સર્વમાઙ્ગલ્યા કીર્તિર્લક્ષ્મીર્યશઃશુભા ॥ ૫॥ (યશસ્વિની)

દહની માલિની ચણ્ડી શબરી સર્વમાત્રિકા ।
કૃતાન્તશાસની રૌદ્રી કૌમારી વિશ્વરૂપિણી ॥ ૬॥

વીર્યપારમિતા દેવી જગદાનન્દરોચની ।
તાપસી ઉગ્રરૂપી ચ ઋદ્ધિસિદ્ધિબલપ્રદા ॥ ૭॥

ધન્યા પુણ્યા મહાભાગા અજિતા જિતવિક્રમા ।
જગદેકહિતા વિદ્યા સઙ્ગ્રામે તારણી શુભા ॥ ૮॥

ક્ષાન્તિપારમિતા દેવી શીલિની ધ્યાનધ્યાયિનો ।
પદ્મિની પદ્મધારી ચ પદ્મપ્રિયા પદ્માસની ॥ ૯॥

શુદ્ધરૂપી મહાતેજા હેમવર્ણા પ્રભાકરી ।
ચિન્તામણિમહાદેવી પ્રજ્ઞાપુસ્તકધારિણી ॥ ૧૦॥

નિધાનં કૂટિમારુઢિધન્યાગારધનપ્રિયા ।
ત્રૈધાતુકં મહા આદિ દિવ્યાભરણભૂષિણી ॥ ૧૧॥

માતરી સર્વબુદ્ધાનાં રત્નધાતે(ત્વી)શ્વરેશ્વરી ।
શૂન્યતા ભાવની દેવી ભાવાભાવવિવર્જિતા ॥ ૧૨॥

વૈન્ચે(ને)ય કિં ન વિન્યસ્તા દિવ્યક્લેશનિછેદની ।
ભી(ભે) દિની સર્વમારાણાં સપ્તપાતાલક્ષોભિની (ણી) ॥ ૧૩॥

બ્રહ્માણી વેદમાતા ચ ગુહ્યા ચ ગુહ્યવાસિની ।
સરસ્વતી વિશાલાક્ષી ચતુર્બ્રહ્મવિહારિણી ॥ ૧૪॥

તાથાગતી મહારમ્યા વજ્રિણી ધર્મધારિણી ।
કર્મધાતેશ્વરી વિદ્યા વિશ્વજ્વાલાભમણ્ડલી ॥ ૧૫॥

બોધ(ધિ)ની સર્વસત્ત્વાનાં બોધ્યઙ્ગકૃતશેખરી ।
ધ્યાના ધીર્મુક્તિસમ્પન્ના અદ્વયદ્વયભાવિની ॥ ૧૬॥

સર્વાર્થસાધની ભદ્રા સ્ત્રીરૂપામિતવિક્રમા ।
દર્શિની બુદ્ધમાર્ગાણાં નષ્ટમાર્ગપ્રદર્શિની ॥ ૧૭॥

વાગીશ્વરી મહાશાન્તિર્ગોપ્ત્રી ધાત્રી ધનપ્રદા ।
સ્ત્રીરૂપધારિણી સિદ્ધા યોગિની યોગજેશ્વરી ॥ ૧૮॥

મનોહરી મહાક્રાન્તિઃ સૌભાગ્યપ્રિયદર્શિની ।
સાર્થવાહકૃપાદૃષ્ટિઃ સર્વતાથાગતાત્મકી ॥ ૧૯॥

નમસ્તેઽસ્તુ મહાદેવી સર્વસત્ત્વાર્થદાયિની ।
નમસ્તે દિવ્યરૂપી ચ વસુધારા નમોઽસ્તુ તે ॥ ૨૦॥

અષ્ટોત્તરશતં નામ ત્રિકાલં યં પઠેત્ પુમાન્ ।
પ્રાપ્નોતિ નિયતં સિદ્ધિમીપ્સિતાર્થમનોરથાન્ ॥ ૨૧॥

યદજ્ઞાનકૃતં પાપમાનન્તર્યસુદારુણમ્ ।
તત્સર્વં ક્ષપયત્યાશુ સ્મરણાત્ સ(ર્વ)ભદ્રકમ્ ॥ ૨૨॥

અથવા શીલસમ્પન્નઃ સપ્તજાતિસ્મરો ભવેત્ ।
પ્રિયશ્ચાદેયવાક્યેન રૂપવાન્ પ્રિયદર્શનઃ ॥ ૨૩॥

વિપ્રક્ષત્રિયકુલેષુ આદેયમુપજાયતે ।
અન્તે ભૂમીશ્વરં પ્રાપ્તઃ પશ્ચાત્ પ્રાપ્ત(ઃ) સુખાવતીમ્ ॥ ૨૪॥

ઇતિ શ્રીવસુધારાનામધારણીસ્તોત્રં સમ્યક્સમ્બુદ્ધભાષિતં સમ્પૂર્ણમ્ ॥

વસુન્ધરાસ્તોત્રમ્

*Vasudharanamadharani Stotram*
pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*